मूत्रस्यन्दनदाहार्त्तो बिन्दुबिन्दु स्रवत्यपि ।
पीड़ितस्तु स्वेहारां संस्तम्भोद्वेष्टनार्त्तिमान् ॥
वस्तिकुण्डलमाहुस्तं घोरं शस्त्रविषोपमम् ।
पवनप्रबलं प्रायो दुर्निरोधमबुद्धिभिः ॥
तस्मिन् पित्तान्विते दाहः शूलं मूत्रविवर्णता ।
श्लेष्मणा गौरवं शोथो मूत्रं स्निग्धं घनं सितम् ॥"
द्रुताध्वलङ्घनं शीघ्रं मार्गचलनम् । उद्वृत्तः उत्थितः । स्यन्दनं किञ्चिच्चलनम् । घोरं मारकम् । शस्त्रविषोपमं शस्त्रं खड्गादि तद्वच्छीघ्रमारकम् । विषमत्र गरः तद्वत् विलम्बमारकम् । एतावता मारकमवश्यं शीघ्रं विलम्बेन वा ॥ १३ ॥ * ॥ तस्यैवासाध्यस्य च लक्षणमाह ।
"श्लेष्मरुद्धविलो वस्तिः पित्तोदीर्णो न सिध्यति ।
अविभ्रान्तविलः साध्यो न च यः कुण्डलीकृतः ॥
स्यादस्तौ कुण्डलीभूते तृष्णामोहः श्वास एव च ॥"
विलं वस्तिमुखरन्ध्रं पित्तोदीर्णः पित्तेनोद्धतः । अविभ्रान्तविलः कफेनानावृतविलः पश्चात् कुण्डलीकृतः स साध्यः । एतेन कुण्डलीभूतोऽसाध्यः । कुण्डलीभूतस्य लक्षणमाह । तृष्णादि- कुण्डलीभूतस्यावमर्थः । कफेन विलावरोधा-च्च वातः कुण्डलाकारेण तिष्ठतीत्यर्थः ॥ * ॥
अथ मूत्राघातस्य चिकित्सा ।
"नलकुशकाशेक्षुवलाक्वाथं प्रातः सुशीतलं सचितम् ।
पिबतो गच्छति नियतं मूत्रग्रह इत्युवाच कविः ॥"
कविः शुक्रः ।
"कर्पूररजसा युक्ता वस्त्रवर्त्तिः शनैः शनैः ।
मेढ्रमार्गान्तरे न्यस्ता मूत्राघातं व्यपोहति ॥
धान्यगोक्षुरकः क्वाथः कल्कसिद्धं हितं घृतम् ।
मूत्राघाते मूत्रकृच्छ्रे शुक्रदोषे च दारुणे ॥"
धान्यगोक्षुरकं घृतम् ।
"मूत्रकृच्छ्राश्मरीरोगे भेषजं यत् प्रकीर्त्तितम् ।
मूत्राघातेषु सर्व्वेषु तत् कुर्य्याद्देशकालवित् ॥"
इति मूत्राघाताधिकारः । इति भावप्रकाशः ॥
गरुड़पुराणोक्तनिदानं तस्य १६२ अध्याये द्रष्टव्यम् ॥ (तथास्य विषयः ।
"वस्तिवङ्क्षिशिरोमेढ्रकटीवृषणपायवः ।
एकसम्बन्धनाः प्रोक्ता गुदास्थिविवराश्रयाः ॥
अधोमुखोऽपि वस्तिर्हि मूत्रवाहिसिरामुखैः ।
पार्श्वेभ्यः पूर्य्यते सूक्ष्मैः स्यन्दमानैरनारतम् ॥
यैस्तैरेव प्रविश्यैनं दोषाः कुर्व्वन्ति विंशतिम् ।
मूत्राघातान् प्रमेहांश्च कृच्छ्राश्मर्य्यसमाश्रयान् ॥"
इति वाग्भटे निदानस्थाने नवमेऽध्याये ॥
अथास्य पथ्यापथ्यानि ।
"अभ्यञ्जनस्नेहविरेकवस्ति-
स्वेदावगाहोत्तरवस्तयश्च ।
पुरातना लोहितशालयश्च
मांसानि धन्वप्रभवानि मद्यम् ॥
तक्रं पयोदध्यपि माषयूषं
पुराणकुष्माण्डफलं पटोलम् ।
मद्यार्द्रकं तालफलास्थिमज्जा
हरीतकीकोमलनारिकेलम् ॥
गुवाकखर्ज्जूरकनारिकेल-
तालद्रुमाणामपि मस्तकानि ।
यथामलं सर्व्वमिदञ्च मूत्रा-
घातातुराणां हितमावहन्ति ॥
विरुद्धानि च सर्व्वाणि व्यायामं मार्गशीलनम् ।
रूक्षं विदाहिविष्टम्भिव्यायामं वेगधारणम् ।
करीरं वमनञ्चापि मूत्राघाती विवर्ज्जयेत् ॥"
इति वैद्यकपथ्यापथ्यविधिग्रन्थे मूत्राघाताधि-कारे ॥)

मूत्राशयः, पुं, (मूत्रस्याशयः आधारः ।) नाभेरधोदेशः । तत्पर्य्यायः । मूत्रपुटम् २ वस्तिः ३ । इति हेमचन्द्रः । ३।२७० ॥ (अथास्य विषयः ।
"मूत्राशये वा गुदमुष्कयोश्च
शोफो रुजा मूत्रविनिग्रहश्च ॥"
इति सुश्रुते उत्तरतन्त्रे ५५ अध्यायः ॥
यथा च तत्रैव निदानस्थाने ३ अध्याये ।
"एकसम्बन्धिनो ह्येते गुदास्थिविवरस्थिताः ।
मूत्राशयो मलाधारः प्राणायतनमुत्तमम् ॥")

मूत्रितः, त्रि, (मूत्रमस्य संजातम् । मूत्र + इतच् । यद्वा मूत्रयति स्म इति । मूत्र + क्तः ।) कृतमूत्रोत्सर्गः । तत्पर्य्यायः । मीढः २ । इत्यमरः । ३ । १ । ९६ ॥

मूर्खः, पुं, (मुह् + "मुहेः खो मूर् च ।" उणा० ५।२२। इति खः धातोः मूरादेशश्च ।) माषः । इति त्रिकाण्डशेषः ॥ गायत्रीरहितः । यथा,
"क्रियाहीनस्य मूर्खस्य महारोगिण एव च ।
यथेष्टाचरणस्याहुर्मरणान्तमशौचकम् ॥
क्रियाहीनस्य नित्यनैमित्तिकक्रियाननुष्ठायिनः । मूर्खस्य गायत्रीरहितस्य । सार्थगायत्रीरहितस्येति रुद्रधरः ॥ महारोगिणः पापरोगाद्यकाम्यतमरोगवतः ते च उन्मादत्वग्दोषौ राजयक्ष्मा श्वासो मधुमेहो भगन्दरः । उदरोऽश्मरीत्यष्टौ पापरोगा नारदोक्ताः । यथेष्टाचरणस्य दूतवेश्याद्यासक्तस्य । इति शुद्धितत्त्वम् ॥

मूर्खः, त्रि, (मुह् + खः । मूरादेशः ।) मुह्यति यः । तत्पर्य्यायः । अज्ञः २ मूढः ३ यथाजातः ४ वैधेयः ५ बालिशः ६ । इत्यमरः । ३।१।४८॥ तस्य वशीकरणोपायो यथा,—
"मित्रं स्वच्छतया रिपुं नयबलैर्लुब्धं धनैरीश्वरं कार्य्येण द्विजमादरेण युवतीं प्रेम्णा गुणै-र्बान्धवान् ।
अत्युग्रं स्तुतिभिर्गुरुं प्रणतिभिर्मूर्खं कथाभिर्बुधं विद्याभी रसिकं रसेन सकलं शीलेन कुर्य्याद्-वशम् ॥"
इति नवरत्नानि ॥
"पयःपानं भुजङ्गानां केवलं विषवर्द्धनम् ।
उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ॥"
इति हितोपदेशः ॥

मूर्खता, स्त्री, (मूर्खस्य भावः । मूर्ख + "तस्य भावस्त्वतलौ ।" ५ । १ । ११९ । इति तल् टाप् ।) मूर्खत्वम् । यथा,—
"अदाता वंशदोषेण कर्म्मदोषाद्दरिद्रता ।
उन्मादो मातृदोषेण पितृदोषेण मूर्खता ॥"
इति चाणक्यम् ॥
"अष्टम्यां नारिकेलभक्षणे मूर्खत्वं यथा,—
"कलङ्की जायते बिल्वे तिर्य्यग्योनिश्च निम्बके ।
ताले शरीरनाशः स्यान्नारिकेले च मूर्खता ॥"
इति तिथ्यादितत्त्वम् ॥

मूर्खभ्रातृकः, पुं, (मूर्खो भ्रातास्येति नित्यं कप् ।) मूर्खो भ्राता यस्य सः । इति सिद्धान्तकौमुदी ॥

मूर्च्छना, स्त्री, (मूर्च्छ + युच् । टाप् ।) गीताङ्गविशेषः । सा तु ग्रामस्य सप्तमभागः । तस्या लक्षणं एकविंशतिनामानि च यथा,—
"स्वरः संमूर्च्छितो यत्र रागतां प्रतिपद्यते ।
मूर्च्छनामिति तामाहुः कवयो ग्रामसम्भवाम् ॥
ललिता मध्यमा चित्रा रोहिणी च मतङ्गजा ।
सौवीरी षण्मध्या च षड्जमध्यमपञ्चमा ॥
मत्सरी मृदुमध्या च शुद्धान्ता च कलावती ।
तीव्रा रौद्री तथा ब्राह्मी वैष्णवी खेदरी सुरा ॥
नादावती विशाला च त्रिषु ग्रामेषु विश्रुताः ।
एकविंशतिरित्युक्ता मूर्च्छना चन्द्रमौलिना ॥
मूर्च्छनां कलयतो मुरशत्रो-
र्वंशिकाध्वनिविशेषवितानैः ।
मूर्च्छनां ययुरनङ्गशरौघै-
रङ्गना रतिपतेरिव सेनाः ॥"
इति सङ्गीतदामोदरः ॥
हनूमन्मते षड्जादिस्वरत ऋषभादिस्वरोत्थाने यत्र स्वरो विरमति सा मूर्च्छना । भरतमते वाद्यस्य गानस्य वा समये यत्र हस्तस्य गलस्य वा कम्पनं सा मूर्च्छना । सा एकविंशतिप्रकारा । तत्र षड्जग्रामस्य मूर्च्छना ललिता १ मध्यमा २ चित्रा ३ रोहिणी ४ मतङ्गजा ५ सौवीरी ६ षण्मध्या च ७ । मध्यमग्रामस्य मूर्च्छना पञ्चमा १ मत्सरी २ मृदुमध्या ३ शुद्धा ४ अन्ता ५ कलावती ६ तीव्रा च ७ । गान्धारग्रामस्य मूर्च्छना रौद्री १ ब्राह्मी २ वैष्णवी ३ खेदरी ४ सुरा ५ नादावती ६ विशाला च ७ । इति सङ्गीतशास्त्रम् ॥

मूर्च्छा, स्त्री, (मूर्च्छ + "गुरोश्च हलः ।" ३ । ३ । १०३ । इति अः टाप् ।) संमोहः । तत्पर्य्यायः । कश्मलम् २ मोहः ३ । इत्यमरः । २।८।१०९। मूर्च्छनम् ४ । इति शब्दरत्नावली ॥ मूर्च्छायः ५ । अथ मूर्च्छाधिकारः । तत्र मूर्च्छाया निदानपूर्व्विकां संप्राप्तिमाह ।
"क्षीणस्य बहुदोषस्य विरुद्धाहारसेविनः ।
वेगाघातादभिघाताद्धीनसत्त्वस्य वा पुनः ॥
करणायतनेषूग्रा बाह्येष्वभ्यन्तरेषु च ।
निविशन्ते यदा दोषास्तदा मूर्च्छन्ति मानवाः ॥"
बहुदोषस्य अधिकदोषस्य । न त्वनेकदोषस्य तदा मूर्च्छा त्रिदोषजैव स्यात् तच्चास्तु को